e-ISSN: 2319-8753 | p-ISSN: 2347-6710

IJIRSET
International Journal of Innovative Research in
SCIENCE | ENGINEERING | TECHNOLOGY




# INTERNATIONAL JOURNAL OF INNOVATIVE RESEARCH

IN SCIENCE | ENGINEERING | TECHNOLOGY

Volume 11, Issue 1, January 2022

INTERNATIONAL STANDARD SERIAL NUMBER INDIA

Impact Factor: 7.569

International Journal of Innovative Research in Science, Engineering and Technology (IJIRSET)

|e-ISSN: 2319-8753, p-ISSN: 2347-6710| www.ijirset.com | Impact Factor: 7.569| A Monthly Peer Reviewed & Referred Journal |

|| Volume 11, Issue 2, January 2022 ||

| DOI:10.15680/IJIRSET.2022.1101136 |

# शिक्षा मनोविज्ञान दृष्ट्या संवेगात्मकबुद्धिः श्रीमद्भगवद्गीतायां संवेगात्मकबुद्धिश्च

**Dr.Laxman Kumar**

Assistant Professor, Department of Education, National Sanskrit University, (A Central University) Tirupati, Andhra Pradesh, India

**शोधसारांशः**

निस्सन्देहरूपेण बालकेषु संवेगात्मकबुद्धेः प्रस्फुटनाय, प्रवर्तनाय, विकासाय च तेषां परिजनाः, मित्राणि, अध्यापकाः, विद्यालयः, जनसंचारः, एतेषां साधनानां महत्वपूर्णभूमिका वर्त्तते। सकरात्मककथानां पठनेन, आदर्शव्यक्तीनामध्ययनेन, अभिव्यक्त्याधारेण, श्रवणस्य ग्रहणस्याभ्यासं प्रोत्साहनेन, सामुदायिकसेवायां भागग्रहणेन, संगीत-ध्यान-योगासनादि क्रियाणां माध्यमेन संवेगात्मकबुद्धिं प्रोत्साहयितुं शक्यते। किन्तु अत्र संवेगात्मकबुद्धेः "ज्ञानम्" तथा तस्याः "प्रयोगः" भिन्नाः भिन्नाः भवन्ति। यत्र "ज्ञानम्" अस्य प्रथमसोपानः अस्ति, तत्र "प्रयोगः" माध्यमेन व्यवहारे आनयनेन संवेगात्मकबुद्धियुक्तं कारयितुं शक्नुमः । व्यक्तिः स्व इन्द्रियाणां साहाय्येन भिन्नसूचनान् सम्प्राप्य तस्याधारेण निर्णयान्नपि स्वीकरोति । सफलजीवनाय सामान्यबुद्धेः अपेक्षया संवेगात्मकबुद्धेः आवश्यकता महत्वपूर्णा सिद्धा वर्त्तते। श्रीमद्भगवद्गीतायां त्रयः गुणाः वर्णिताः सन्ति –सत्त्वगुणः, राजोगुणः, तमोगुणः च । एतेषां त्रयाणां गुणानां सन्दर्भे भावः अपि उल्लिखितः अस्ति। राजोगुणः - इच्छाः भावाः च तीव्राः भवन्ति, ये व्यक्तिं कर्म प्रति प्रेरयन्ति, परन्तु एषः भावः अशांतः अस्थिरः च भवति। तर्हि गोलमैन् महोदयेन कृतः संवेगात्मकबुद्धिसिद्धान्तस्यावश्यकता शिक्षा क्षेत्रे अपि परिदृश्यते। यतोहि शिक्षायाः प्रमुखमुद्देश्यमस्ति सच्चरित्रनिर्माणम्, प्रभावी व्यक्तित्वं तथा जीवने सफलतानयनम्। संवेगात्मकबुद्धिः (Emotional Intelligence) शिक्षामनोविज्ञानक्षेत्रे किञ्चित्कालादिदानीं विद्वद्भिः **"संवेगात्मकबुद्धिः"** नाम्ना एका सम्प्रत्ययविषये बहुधा चर्चा परिलक्षते।

**प्रस्तावना -**

यया कश्चित् विषयः बुध्यते, कश्चन किञ्चित् ज्ञानम् अधिगच्छति, शिक्षितो वा भवति, अज्ञातविषयवस्तुनः परिचयं प्राप्नोति, तद्विषयेषु ज्ञानवान् भवति, सा भवति शिक्षा। इयं शिक्षा तु अज्ञातविषयाधिगमः एव। संस्कृत भाषायाः "शिक्ष" धातोः "घञ्" प्रत्ययः "टाप्" प्रत्ययः युक्तेन "शिक्षा" शब्दः निष्पद्यते। श्री**मद्भगवद्गीता** सा विद्या, या विमुक्तये। **ईषावस्योपनिषद् -** विद्ययाऽमृतमश्नुते। **रविन्द्रनाथटैगोरः** शिक्षा अस्माकं जीवनस्य सर्वासामपि समस्यानां समाधानाय विद्यमाना राजपथैव, **स्वामि विवेकानन्दः** मानवान्तर्निहित दैवात्मरूपम् अभिव्यञ्जनमेव शिक्षा। **अरस्तुः** स्वस्थशरीरे स्वस्थमनस नाम शिक्षा। **(Creation of Sound mind in Sound body is Education.) जाँन् डिवि** - जीवनयापनस्य प्रक्रियैव शिक्षा। (Education is a process of living.) बालकीयव्यवहारविपरिणात्मिका शक्तिरपि शिक्षा इति परिभाष्यते। यतोहि बालानां व्यवहारज्ञानं विना तेभ्यः प्रभावपूर्णशिक्षाप्रदानं दुष्करमेव। काञ्चन घटनां प्रति जीवस्य प्रतिक्रियां "संवेगः" इत्युच्यतैति केषाञ्चन मनोवैज्ञानिकानामभिप्रायः। स्नेह-सुख-प्रेम-मैत्री इत्यादयः सकरात्मकसंवेगाः व्यक्तिं सामाजिकदृष्ट्या वाञ्छनीयकार्याणि कर्तुं प्रेरयन्ति। यत्र क्रोध-भय-दुःख-घृणा-कामवासनादि नकरात्मकसंवेगाः व्यक्तिमसामाजिक तथा अवाञ्छनीयकार्याणि कर्तुमग्रेसारयन्ति। पूर्वं मन्यते यत्,-व्यक्तिः स्वस्य बुद्ध्याधरेण भिन्न-भिन्नपरिस्थितिषु समायोजनं करोति। इदानीं नोरमा मीक् (Norma Meek) तथा पैटी (Patty) एते विश्वासकर्तुमारब्धवन्तः यत्, बुद्धिलब्धिः (IQ) केवलं प्रायः विंशतिप्रतिशतं जीवने सफलतायै योगदानं ददाति । किन्तु अतिरिक्ताशीतिप्रतिशतं तु संवेगात्मकबुद्धेः, संयोगस्य, तथा पृष्ठभूमेः चेतेषां कारकाणां भूमिकास्ति । अतः शिक्षायाः पूर्णतासम्पादनाय मनेविज्ञानस्याध्ययनमप्यावश्यकम्।

**मनोविज्ञानम्-**

मनोविज्ञानस्य शाब्दिकार्थः- मनोविज्ञानम् आङ्ग्लभाषायां "Psychology" भवति । पदमेतत् "Psyche" तथा "Logos" इति ग्रीक् पदाभ्यां निष्पन्नम्। "Psyche" नाम आत्मा "Logos" नाम विज्ञानम् । अतः "Psychology" नाम आत्मनः विज्ञानमित्यर्थः । मनोविज्ञानस्य उत्पत्तिः Psyche + Logos = Psychology आत्मा + विज्ञानम् = आत्मनः विज्ञानम् अध्ययनाय विद्यमानेषु विज्ञानशास्त्रेषु मनेविज्ञानं खलु प्रभावपूर्ण, विज्ञानवाक्यानां मूर्धन्यमवतिष्ठते। प्राचीनकाले मनेविज्ञानं दर्शनशास्त्रस्य शाखा आसीत्। नारायणावतारे परमात्माश्रीकृष्णेन गीतायां निगदितम् **सर्गाणामादिरन्तश्च मध्यं चैवाहमर्जुन। अध्यात्मविद्या विद्यानां वादः प्रवदतामहम्** । वैदेशिकेषु ग्रीक् देशस्य दार्शनिकाः आत्मनः विषये अध्ययनमारब्धवन्तः । ततः प्राक् भारते वैदिककालादारभ्य आत्मनः विषये अध्ययनं प्रचलितमासीत्। प्रसिद्धग्रीकविदुषा अरस्तुमहोदयेन (Aristotle 384-322) De Anima इत्यस्मिन् ग्रन्थे मनश्शास्त्रमधिकृत्य पृथक् विवेचितम् । तस्मात् दर्शनशास्त्रस्य शाखाभूतमिदं शास्त्रं स्वतन्त्रशास्त्ररुपेण परिभाषितम् । F.A. Lange महोदयः 1866 तमवर्षे History of Materialism इति ग्रन्थे "Psychology" इति शब्दस्य आद्यप्रयोगमकरोत्। तस्य मतानुसारेण मनोविज्ञानमात्मनः

|e-ISSN: 2319-8753, p-ISSN: 2347-6710| www.ijirset.com | Impact Factor: 7.569| A Monthly Peer Reviewed & Referred Journal |

|| Volume 11, Issue 2, January 2022 ||

| DOI:10.15680/IJIRSET.2022.1101136 |

विज्ञानत्वेनापेक्षितः वर्त्तते। सम्प्रति विज्ञानेऽस्मिन् मानसिकतथ्यानां वर्णनं प्रचलति । मनोविज्ञानस्य विकासक्रमःवस्तुतः आत्मनः विज्ञानं मनोविज्ञानमिति लक्षणं प्रथममेव स्वीकृतम्। अनन्तरं मनसः विज्ञानमिति मनोविज्ञानस्यार्थरभवत्। अन्यस्य मनसः स्वरुपमस्पष्टत्वात् अयमपि त्यक्त्वा चैतन्यस्याध्ययनं मनोविज्ञानं (Science of Consciousness) स्वीकृतम्। किन्तु अत्र विचारणीयमस्ति, यदि मनोविज्ञानमात्मनः, मनसः, चैतन्यस्य वा विज्ञानमित्युच्यते तर्हि मनोविज्ञानस्य विज्ञानसंज्ञा न युज्यते। अतः गच्छताकालेन व्यवहारस्य विज्ञानं मनोविज्ञानमित्यभिहितम्। यतोहि शिक्षायाः प्रधानमुद्देश्यं, व्यक्तेः अन्तर्निहितशक्तेः अधिकतम सहज-स्वाभाविकं तथा सर्वाङ्गीणविकास सम्पाद्य तस्य समाजोपयोगी नागरिकरुपेण निर्माणम् । अतः शिक्षामनोविज्ञानस्योद्देश्यमपि तथैव भवेत्। शिक्षामनोविज्ञानस्य प्रमुखोद्देश्यानां विभाजनं प्रकारद्वयेन कृतमस्ति। प्रथमः छात्रव्यवहारे समृद्धिरानयनम्, द्वितीयः अध्यापकानां कृते स्वशिक्षणे सुधारतानयनार्थं सहायताप्रदानम्।

**संवेगात्मकबुद्धिः**

"संवेगात्मकबुद्धिः" इति शब्दः "संवेगात्मक" तथा "बुद्धिः" शब्द-द्वयेन निर्मितः भवति । संवेगात्मकशब्दः संवेगेन साकं सम्बद्धः भवति। अतः संवेगात्मकबुद्धिः संवेगानां सम्यक् व्यवहर्तुं संज्ञानात्मकक्षमतां निर्दिशति। निःसन्देहरुपेण इयं संवेगानामवगवनमभिव्यक्तुं तथा च लक्षप्राप्तये प्रबन्धनाय क्षमतास्ति । अस्मिन् व्यक्तेः स्वसंवेगमन्येषां संवेगं ज्ञातुमवगन्तुं प्रबन्धनं कर्तुञ्च योग्यता भवति । स्पष्टमस्ति यत् संवेगात्मकबुद्धिः संवेगानुचितदिशाप्रदातुं, तेषां स्वविचारप्रक्रियायां समन्वयितुं लक्ष्यप्राप्त्यार्थं, नूतनपरिस्थितिषु उत्तमरूपेण समायोजनं कर्तुञ्च क्षमतास्ति। संवेगात्मकबुद्धेः परिभाषा विषये बहवः मनोवैज्ञानिकाः अनुसन्धातारश्च स्वीयपरिभाषां प्रस्तुतवन्तः। Solvay n Mayer (1990) स्वस्य तथा अन्येषां संवेगानां भावनानाञ्चोपरि ध्यानं दत्त्वा तेषां निरीक्षणं कृत्वा च कार्यकरणाय मार्गदर्शयितुं तस्योपयोगाय च क्षमतास्ति संवेगात्मकबुद्धिः। Reuven Bar on (1996) संवेगात्मकबुद्धिः इत्युक्ते, असंज्ञानात्मक (Emotional and Social) क्षमतानां, दक्षतानां, कौशलानाञ्च एकं श्रृङ्खलमस्ति, यत्, पर्यावरणे आवश्कतानां पूरणं कृत्वा सफलताप्रदानाय क्षमतां प्रभावयति। Byron Stock (2007) स्वस्य तथा अन्येषां संवेगानामाधारेण ज्ञानं सम्प्राप्य, तस्योपयोगस्य क्षमतास्ति संवेगात्मकबुद्धिः।अतः इदानीं मन्यते यत्, सामान्यमानसिकयोग्यतायाः अतिरिक्तं संवेगानां प्रदर्शनम्, अनुकूलनं, प्रबन्धनं, नियन्त्रणञ्च कर्तुं क्षमतापि व्यक्तेः समायोजनं प्रभावयन्ति। संवेगानां सम्यगुपयोगी प्रभावीपूर्णरुपेण प्रबन्धनस्य,नियन्त्रणस्य च क्षमता संवेगात्मकबुद्धिरित्युच्यते। वस्तुतः कस्यापि सुसमायोजित प्रसन्न-सफलव्यक्तेः जीवने सामान्यबुद्धेरपेक्षया संवेगात्मकबुद्धिःअधिका महत्वपूर्णा सिद्धा भवति। **"Time magazine"** इति पत्रिकायां Nancy Gibbs इत्यनुच्छेदः गोलमैनमहोदयानां पुस्तकम् इतोऽपि लोकलोचनमानितम्। 1996 तमाब्दे Dr Reuven Baron महोदयः "संवेगात्मकबुद्धिः" अस्माकं भावनायाः तथा अन्यैः जनैः साकं सफलतापूर्वकं व्यवहर्तुमेका क्षमतास्ति । एषः महोदयः "Bar-On EQ-i" इति नाम्ना एकां संवेगात्मकबुद्धिमापनिं प्रस्तुतवान् । एषा सूची प्रथमवैज्ञानिकरूपेण विकसिता संवेगात्मकबुद्धिमापन्यस्ति। या प्रतिदिनपारिपार्श्विकाह्वानानि सम्मुखिकर्तुं व्यावसायिक तथा वैयक्तिक जीवने सफलतायै सहायार्थं योग्यतां प्रतिपादयति। मापनमिदं पञ्चसु क्षत्रेषु क्रियते। यथाः-

* Interpersonal. (अन्तर्वैयक्तिकम्)
* Intrapersonal. (पारस्पारिकम्)
* Adaptability (अनुकूलशीलता)
*Stress management. (तन्यताप्रबन्धनम्)
* General mood. (सामान्यमनोस्थितिः) च।1995 तमवर्षे गोलमैनमहोदयेन स्व पुस्तके **"Emotional Intelligence; Why it matters more than IQ"** संवेगात्मकबुद्धेः सम्प्रत्ययमेकं व्यापकपरिचयप्रदत्तमस्ति। अतः संवेगात्मकबुद्धिसिद्धान्तस्य प्रतिपादकरुपेण Daniel Goleman महोदयः परिचितः। एषः महोदयः संवेगात्मकबुद्धिं निम्नरुपेण परिभाषितवान् -"संवेगात्मकबुद्धिः योग्यतानां कौशलानाञ्च एका व्यापकसमुच्चयरस्ति, यत् नेतृत्वनिष्पादने प्रोत्साहयति ।" (Emotional Intelligence is a wide array of Competencies and skills that drive leadership performance.) व्यापकार्थे यानि कौशलानि, अभिवृत्तयः, योग्यताः, क्षमताः व्यक्तेः व्यवहारम्, अनुक्रियां, मनस्थितिं, सम्प्रेषणशैलीं निर्धारयन्ति तानि संवेगात्मकबुद्धिरित्युच्यते। पुनः संवेगात्मकबुद्धेः पक्षे द्वे स्तः -

१) स्व लक्ष्यानां, मन्तव्यानां, प्रतिक्रियाणां, व्यवहारादीनामवगमनम् ।
२) अन्येषां भावनानां, संवेगानाञ्चावगमनम् ।

वस्तुतः संवेगात्मकबुद्धौ स्व सूचना, संवेगप्रबन्धनम्, आत्म अभिप्रेरणम्, अननुभूतुः, द्वन्दसमाधानादि योग्यताः भवन्ति । इदानीं संवेगात्मकबुद्धेः सिद्धान्तस्य त्रयः प्रतिकृतयःप्रचलिताः सन्ति -

१) योग्यता प्रतिकृतिः । (Ability Model)
२) शीलगुण प्रतिकृतिः। (Trait Model)
३) मिश्रित प्रतिकृतिः । (Mixed Model)

**पीटर सेलवे तथा जॉन मेयर** एतौ सततानुसन्धानाधारेण पुरातनपरिभाषायां परिवर्त्तनमानीय संवेगात्मकबुद्धेः सम्प्रत्ययं "नवीनबुद्धिः" New Intelligence कृत्वा निम्नरुपेण परिभाषितवन्तौ।-"संवेगात्मकबुद्धिरेका एतादृशीयोग्यतास्ति, यया संवेगानां प्रत्यक्षीकरणं,

|e-ISSN: 2319-8753, p-ISSN: 2347-6710| www.ijirset.com | Impact Factor: 7.569| A Monthly Peer Reviewed & Referred Journal |
|| Volume 11, Issue 2, January 2022 ||
| DOI:10.15680/IJIRSET.2022.1101136 |

एकीकरणेन सुलभविचारान् प्रतिपादनं, संवेगानामवगमनं नियन्त्रणश्च भवति, वैयक्तिकप्रगतिः सिद्ध्यति। संवेगात्मकबुद्धौ निम्नस्थाः चतुर्प्रकारकाः योग्यताः समाहिताः भवन्ति । - प्रतिकृत्यनुसारं
१) संवेगानां प्रत्यक्षीकरणम्। (Perception of Emotions)
२) संवेगानामुपयोगः । (Use of Emotions)
३) संवेगानामवबोधः । (Comprehension of Emotions)
४) संवेगानां प्रबन्धनम् । (Management of Emotions)

**गोलमैन महोदयेन** कृतः संवेगात्मकबुद्धिसिद्धान्ते पञ्चघटकाः भवन्ति । -
१) आत्मजागरुकता । (Self - Awareness)
२) आत्मनियमनम् । (Self-Regulation)
३) आन्तरिकाभिप्रेरणम्। (Motivation)
४) करुणा/अननुभूतिः । (Empathy)
५) सामाजिककौशलानि। (Social Skills)

एते कौशले जन्मजाते न, अपितु अर्जिते भवतः । अतः उच्यते बालकस्य मस्तिष्कस्य शिक्षणं यावत् महत्त्वपूर्ण तस्य हृदयस्य शिक्षणमपि तावत् महत्त्वपूर्णमस्ति। अतः तस्मै आदौ समुचितरूपेण शिक्षां सम्भाषणकौशलं शिक्षयित्वा, आदर्शोदाहरणानि प्रस्तूय अभ्यासेन बालकस्य संवेगात्मकबुद्धिं विकासयितुं शक्यते। बालकेषु संवेगात्मकबुद्धेः विकासाय निम्नोक्तकौशालानां विकासः अनिवार्यः
* सम्प्रेषणम् । (Communication)
* अननुभूतिः । (Empathy)
* आत्म- जागरुकता । (Self-Awareness)
* निर्णयस्वीकरणम्। (Decision Making)
* समस्यासमाधानम्। (Problem Solving)
* सहभागिता । (Sharing)
* धौर्यम् ।(Patience)
* श्रव्यक्षमता। (Listening)
* यत्नशीलता । (Caring)
* सामूहिकता । (Groupism)
* विनम्रता । (Gentilism)
* अध्यवसायी। (Perseverance)
* आत्म - अभिप्रेरणम् । (Self-Motivation)
* आत्म - नियन्त्रणम्। (Self-Control)

**श्रीमद्भगवद्गीतायां संवेगात्मकबुद्धिः**
**यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ । समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ।।**

गीतायां संवेगभावः केवलं मानसिकः भावात्मकःअवस्था न भवति, अपितु एका ऊर्जा भवति, यया व्यक्तिं कस्यापि दिशिं चालयति। यदा एषः भावः अनियंत्रितः अविवेकी च भवति तदा मनुष्यः स्वधर्मात् कर्तव्यात् च व्यभिचरति । किन्तु विवेकेन,ध्यानेन,आत्मसंयमेन च नियन्त्रिते सति एषः भावःव्यक्तिं बोधं,कर्तव्यं,मोक्षं च प्रति नयति। श्रीमद्भगवद्गीतायां त्रयः गुणाः वर्णिताः सन्ति – सत्त्वगुणः, राजोगुणः, तमोगुणः च । एतेषां त्रयाणां गुणानां सन्दर्भे भावः अपि उल्लिखितः अस्ति । राजोगुणः - इच्छाः भावाः च तीव्राः भवन्ति, ये व्यक्तिं कर्म प्रति प्रेरयन्ति, परन्तु एषः भावः अशांतः अस्थिरः च भवति । तमोगुणः – रागः आलस्यं, आसक्तिं, अज्ञानं च जनयति। सत्त्वगुणः- एषा भावना शान्तिं, प्रज्ञां, संतुलनं च जनयति, यत् व्यक्तिं मानसिकशान्तिं आध्यात्मिकप्रगतिं च प्रति प्रेरयति। भावः बुद्धिश्च (अध्यायः २) अर्जुनं श्रीकृष्णः वदति- यत् सम्यक् कर्मकरणस्य आधारः न केवलं बुद्धिः, अपितु संवेगानां नियन्त्रणमपि स्थापनीयम् अनेन भावबुद्धयोः सन्तुलनं स्थापयितुं समर्थःभवति ।अन्ते अर्जुनः स्वस्य भावनां-संवेगाणां सम्यक् दिशि निर्देशयति, युद्धं कर्तुं च निश्चयति। एतत् परिवर्तनस्य उदाहरणम् अस्ति, येन भावनानां सम्यक् नियन्त्रणेन, निर्देशनेन च मनुष्यस्य जीवनस्य लक्ष्यमोच्चतमं प्रति गच्छति । श्रीमद्भगवद्गीतायाः द्वितीयध्यायस्थ पञ्चदशश्लोकः अयं एकः विश्लेषणात्मकश्लोकरस्ति । यत् संवेगात्मकबुद्धेः सम्पूर्णावधारणयाः सारमत्र प्रतिपादयति। श्लोकेऽस्मिन् वर्णितमस्ति –

**दुःखं सुखञ्च समानं मन्यमानो यो धीरः पुरुषः इन्द्रियविषययोः संयोगेत्थया व्यथया कदाऽपि न व्यथितो भवति, स मृत्योः परस्यामृततत्त्वस्य प्राप्तेर्योग्यतां दधिति ।**

|e-ISSN: 2319-8753, p-ISSN: 2347-6710| www.ijirset.com | Impact Factor: 7.569| A Monthly Peer Reviewed & Referred Journal |

|| Volume 11, Issue 2, January 2022 ||

| DOI:10.15680/IJIRSET.2022.1101136 |

यदा धर्मक्षेत्रे कुरुक्षेत्रे युद्धस्य प्रारम्भात्प्रागर्जुनस्य मनसि द्विधास्थितिरागच्छति, युद्धं करणीयं न वा, यतोहि सः स्व परिस्थितिं बौद्धिकरूपेणावगन्तुं विश्लेषयितुञ्च सक्षमः किन्तु तस्य सांवेगिकास्थिरता कारणात् सः समस्यायाः आकलनं कर्तुमसमर्थः । अतः सः परमात्मनः श्रीकृष्णस्य सवीधे सहायार्थं स्वसमस्यां परिभाषयति –

**कार्पण्यदोषोपहतस्वभावःपृच्छामि त्वां धर्मसम्मूढचेताः। यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ।।2**
अर्थात्, कायरतादोषप्रभावतो नष्ट स्वभावो धर्मतत्त्वविषये सर्वथा मोहितमनाः भवन्तं पृच्छामि। यत् किञ्चित् सुनिश्चितरूपेण परमकल्याणकृद्भवेत् तत्साधनं मां ब्रूहि । कुतोह्यहं तव शिष्योऽस्मि, शरणागतोऽस्मि, मां साधनापथं प्रापय। मात्रशिक्षां मा देहि, प्रत्युत् यत्र स्खलनं भवेत् तत्र मां सम्भालय। एवंभूतं समर्पणमर्जुनस्यासीत् । द्वितीयोऽध्यायस्य पञ्चदशश्लोकाधारेण यदि संवेगानां नियन्त्रणेन प्रबन्धनेन च कार्यसिद्धिर्भवति, एवञ्च स्थितप्रज्ञव्यक्तिः एतत्सर्वं कर्तुं समर्थः, अतः तदा अर्जुनस्योत्कण्ठा स्वभाविकासीत् यत् ते महापुरुषाः किदृशाः सन्ति ये अनामयपदे स्थिताः सन्ति, येषां बुद्धिः समाधौ स्थिरा भवति । सः अकरोत् प्रश्नम् –

**स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव । स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ।।३**
अर्थात्- अर्जुनः प्रपच्छ समाधिस्थ स्थिरबुद्धिवतां पुरुषस्य लक्षणं किमस्ति ? स्थिरप्रज्ञः पुरुषः कथं ब्रूते ? स कथं तिष्ठति ? कथं चलति ? प्रश्नचतुष्टयं कृतवानर्जुनः।एतैः ज्ञायते संवेगात्मकस्थिरव्यक्तिः स्थितप्रज्ञरभिधीयते। किन्तु कस्याः अपि समस्यायाः निराकरणत् प्राक् तस्याः समस्यायाः किं कारणमिति ज्ञान्तव्यम्। अतः संवेगात्मकस्थिरतायाः कारणं किमिति प्रश्नस्योत्तरं श्रीकृष्णस्य शब्देन-

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते । सङ्गात्सञ्जयते कामः कामात्क्रोधोऽभिजायते । ।4**
विषयचिन्तनं कर्तृणां पुरुषाणां तत्तद्विषयेष्वासक्तिः सम्भवति।आसक्त्या कामना उत्पद्यन्ते। कामना पूर्त्तौ समायाते व्यवधाने क्रोधः प्रादुर्भवति। क्रोधः कं विकारं जनयति ? -

**क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः । स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।5**
क्रोधात् विशेषप्रकारयुता मूढता अर्थादविवेकः समुत्पद्यते। नित्यानित्य वस्तुनो विचारो विनश्यति । अविवेकेन स्मरणशक्तिर्धान्ता भवति। यथार्जु) नोऽभवत्- 'भ्रमतीव च मे मनः' । गीतायाः समापनावसरे स अवोचत्- **"नष्टो मोहः स्मृतिर्लब्धा"।** किं करवाणि किन्न करवाणि एतस्य निर्णयो न भवितुं शक्नोति । स्मृतौ भ्रान्तायां योगपरायणा बुद्धिर्विनश्यति (, विनष्टायाञ्च बुद्धौ स पुरुषः स्वश्रेयसाधनात् च्युतो भवति । परन्तु एकः साधारणजनः कामनां वासनाञ्च त्यक्त्वा इन्द्रियसंयमकृत्वा स्थितप्रज्ञः कथं भवति, अतः श्रीकृष्ण तेभ्यः साधारणजनेभ्यः कर्मयोगस्य मार्गं प्रतिपादितवान् -

**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूमा ते सङ्गोऽस्त्वकर्मणि ।।6**
अर्थात् कर्मसम्पादनमेव स्यात् तवाधिकारः, फलप्राप्तौ न कदाप्यधिकारः । एवं जानीहि कर्मणः फलमस्त्येव नहि । फलस्य वासनायुक्तोऽपि मा भव तथा कर्मविधाने तवा आश्रद्धाऽपि मा स्यात् ।
**युक्त कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते ।।**
योगयुक्तः अर्थात् प्राप्तयोगपरिणामाः पुरुषाः सर्वेषां प्राणिनामात्मनो मूले संस्थितः । यः परमात्मा विद्यते तत्रैव सोऽपि भवति समाश्रितः, एवंभूतः योगी कर्मफलं त्यक्त्वा नैष्ठिकीं शान्तिमाप्नोति । यदग्रे शान्तेः न काऽपि स्थितिः (कर्मणां फलं परमात्मा न तद्भिन्नोऽस्ति), यदनु स कदाप्यशान्तो न भवति । किन्त्वयुक्तः पुरुषः यः योगपरिणामयुक्तो नास्ति, इदानीं मार्ग एव वर्त्ततेएतादृशः पुरुषः फले समासक्तः **'कामकारेण निबध्यते'** कामनया निबध्यते अर्थात्पूर्तिपर्यन्तं कामनाः जागृताः भवन्ति, अतः पूर्तिपर्यन्तं साधकेन सावधानेन वर्तितव्यम् ।

**उपसंहारः**

संसारेऽस्मिन् बहुविधा जनाः वर्तन्ते । तेषु केचन मन्दाः केचित् कुशाग्रबुद्धयः केचन तीव्रकोपाः, केचन सर्वदा शान्ताः, धीराः, भीताः वा दृश्यन्ते । तथापि स्वस्य जीवनचक्रं सुखेन सानन्देन च निर्वाहयितुं सर्वे प्रयतन्ते। समाजेन सह सामञ्जस्य स्थापनपूर्वकं कार्यनिर्वहणम् उत्तममानवस्य लक्षणमेव, कुत्रापि समेषां चिन्तनधाराः, रुचयः, आशाश्च समानाः न भवन्ति । एकस्मिन् कुले जातानां भ्रातृणां स्वव्यवहारं विनिश्चयश्च विभिन्नाः परिलक्ष्यन्ते। रूचिश्च भिन्नाः भवन्ति। केचन जनाः स्वकार्यमपि निर्वोढुं शक्ताः परमुखाप्रेक्षिणः भवन्ति । सफलतायाः शिखरं स्पर्शने अशक्ताः भवन्ति । शैशवावस्थायां तु शिशव उच्चैः क्रन्दनं कृत्वा स्वस्यासांवेगिको सामञ्जस्यां विषयान् प्रकाशयन्ति। परन्तु शनैः शनैः शिशुः यदावर्धति तदा स विभिन्नाभिव्यक्तिद्वारा सांवेगिक भावनां प्रकटयति कदापि स संवेगान् करोति । यदि समाजे सर्वजनाः संवेगानां बहिः प्रकाशनं कुर्वन्ति तर्हि सदा सुखमावहति। भावनायाः प्रकाशनं करोति चेत् भावना आगामिनि जीवने अत्यन्तः सक्रियः तीव्ररूपेण स्वस्थरूपं प्रकटयति। प्रपञ्चेऽस्मिन् मानवस्य विकासपरम्परायाः अवस्थाः मुख्याःवर्तते।"अद्यतनबालाः एवं स्वस्तनपौराः" इत्युक्तिः विद्यते। यद्येते छात्राः स्वाध्याय दायित्वबोधनैतिकतादीनां विषयेषु गाम्भीर्येण चिन्तयित्वा आचरणं कुर्युः तर्हि अस्माकं देशस्य उन्नतिः सम्यग्रुपेण समयेन भविष्यत्येव बालाः एव नेतारूः, शास्त्रज्ञाः, आलोचकाः सृजनात्मकशक्तिसम्पन्ना च भविष्यन्ति ।यद्यपिबालाः राष्ट्ररूपभवनस्य इष्टिका सदृशाः परमस्यापि इष्टिकापेक्षया तन्निर्मातुः एव प्राधान्यमिति कथने न काऽपि अतिशयोक्तिः।

|e-ISSN: 2319-8753, p-ISSN: 2347-6710| www.ijirset.com | Impact Factor: 7.569| A Monthly Peer Reviewed & Referred Journal |

|| Volume 11, Issue 2, January 2022 ||

| DOI:10.15680/IJIRSET.2022.1101136 |

## संन्दर्भसूची

1. श्रीमद्भगवद्गीता 2.15
2. श्रीमद्भगवद्गीता 2.7
3. श्रीमद्भगवद्गीता. 2.54
4. श्रीमद्भगवद्गीता. 2.62
5. श्रीमद्भगवद्गीता. 2.63
6. भार्गव, एस. (1977) आधुनिक मनोवैज्ञानिक परीक्षण एवं मापन, अग्रवाल पब्लिकेशन, आगरा
7. माथुर, एस. एस. (2013) शिक्षा की दार्शनिक तथा समाजिक आधार, अग्रवाल पब्लिकेशन, आगरा
8. मंगल, एस. के. (2008) शिक्षा में सांख्यिकी (2एडी), पी.एच.आई.प्र.लि., जयपुर
9. वालिया, जे. (2010) शिक्षा तकनीकी, अहम पाल पब्लिशर्स, पंजाब
10. गुप्ता, एस० पी० एवं गुप्ता, ए० (2008) उच्चतर शिक्षा मनोविज्ञान शारदा पुस्तक भवन, इलाहाबाद
11. जायसवाल, एस० (1992) शिक्षा मनोविज्ञान, रेलवे क्रासिंग सीतापुर रोड, लखनऊ
12. शर्मा, आर० ए० (2011) शिक्षा अनुसंधान के मूल तत्व एवं शोध प्रक्रिया, आर लाल बुक, डिपो, मेरठ




INNO SPACE

SJIF Scientific Journal Impact Factor

Impact Factor:
7.569

doi® crossref

ISSN INTERNATIONAL STANDARD SERIAL NUMBER INDIA

निस्केयर NISCAIR

# INTERNATIONAL JOURNAL OF INNOVATIVE RESEARCH

IN SCIENCE | ENGINEERING | TECHNOLOGY

9940 572 462 6381 907 438 ijirset@gmail.com

Scan to save the contact details

www.ijirset.com